CC-0. In Public Domain. Digitization by eGangotri

अर्चिरादिमार्गवैभवम्

श्रीमते रामानुजाय नमः ।

श्रीरङ्गमङ्गलमहोत्सववर्धनाय
वेदार्थपान्थपरमार्थसमर्थनाय
कैङ्कर्यलक्षणविलक्षणमोक्षभाग्यो
रामानुजो विजयते यतिराजराजः ।।

इति सङ्कीर्तनार्हः श्रीरामानुजाचार्यः स्वरूपोपायपुरुषार्थान् प्रतिपाद्य सकलचेतनान् सदाचार्यसमाश्रयणयोग्यान् कृत्वा परमपदस्य गमनोपायं परमपदं मार्गं च विशदं वक्तुमारब्धवान् । अनन्तकोटिब्रह्माण्डनायकः श्रीमन्नारायणः स्वयं च स्वस्य लीलार्थं,

अण्डानां च सहस्राणि
सहस्राण्ययुतानि च ।
ईदृशानि तथा चैव
कोटिकोटिशतानि च ।

इत्थमण्डानि बहूनि सन्ति । तेष्वण्डेषु मध्ये एकस्याण्डस्य प्रमाणं कियदिति चेत्, चतुर्दशभुवनात्मकं भूत्वा स्थितम् । तानि चतुर्दशभुवनानि ब्रह्माण्डान्तर्गतानि केन क्रमेण सङ्गतानीति तत्राह–

भूलोकस्याधोभागे पाताल, रसातल, महातल, तलातल, अतल, सुतल, वितलानीति पातालसप्तकं, भूर्लोक, भुवर्लोक, स्वर्लोक, महर्लोक,

Ms. utilised - No. 9860

CC-0. In Public Domain. Digitization by eGangotri

जनलोक, तपोलोक, सत्यलोक इति ऊर्ध्वलोकसप्तकं च एवंप्रकारेण चतुर्दशभुवनात्मकमेकमण्डम् । तत्रैकस्य भुवनस्य प्रमाणं कियदिति चेत्, तत्र भूर्लोकस्य प्रमाणं दर्शयतिः—

जम्बु, प्लक्ष, कुश, क्रौञ्च, शाक, शाल्मलि, पुष्कराणि द्वीपसप्तकं च, लवण, इक्षु, सुरा, सर्पि, दधि, दुग्ध, शुद्धोदकाः सप्त सागराश्चं । एतैः परिवृतो भूत्वा पञ्चाशत्कोटिविस्तीर्णे भूमध्ये मेरुस्तिष्ठति । तस्य मेरोः भूम्यन्तर्गतं मूलं षोडशसहस्रयोजनापरिमितम् । अधोभागे मूलं विस्तीर्णं च षोडशसहस्रयोजनापरिमितम् । चतुरशीतिसहस्र-योजनमुच्छ्रितम् । उपरि द्वात्रिंशत्सहस्रयोजनपरिमितं विस्तारम् । एवं-भूतं मेरुं वेष्टयित्वा जम्बुद्वीपो लक्षयोजनविस्तारेण तिष्ठति । लक्षयोजन-विस्तीर्णो लक्षयोजनगम्भीरश्च लवणसमुद्रोऽस्ति । एतत्प्रकारेण समुद्राः द्वीपैः सह द्विगुणद्विगुणोत्तरीभूत्वा तिष्ठन्ति । अत्र जम्बुद्वीपो लक्षयोजना-त्मको मेरोरुत्तरे भागे तिष्ठति । वर्षाणि त्रीणि दक्षिणभागे । पूर्वभागे वर्षमेकम् । पश्चिमभागे वर्षमेकम् । मेरुपरितो वर्षमेकम् । तेषामेकैकं वर्षं नव नव सहस्रं योजनपरिमाणेन भारत, इलावर्त्त, किंपुरुष, भद्राश्व, केतुमाल, हिरण्मय, रम्यक, हरि, कुरु इति नवखण्डा पृथिवीति प्रसिद्धा । सम्भारभूतेभ्य उदितगर्भोदितस्य गम्भीरमण्डकटाहं सृष्ट्वा भूमि-पर्यन्तमशीतिलक्षषष्टिसहस्रयोजनानि च अतलवितलपातालादिसप्तकस्याधारो भूत्वा जलं स्थितम् । जलसीमाप्रदेशभूमेरुच्चता लक्षषष्टिसहस्रयोजन-परिमिता । भूमिमारभ्य ध्रुवमण्डलपर्यन्तं पञ्चदशलक्षयोजनानि । तदुपरि महर्लोकं कोटियोजनम् । तदुपरि जनलोकं योजनकोटिद्वयपरिमितम् । तदुपरि तपोलोकं अष्टकोटियोजनपरिमितम् । तदुपरि सत्यलोकं अष्टचत्वारिं-शत्कोटियोजनपरिमितम् । एवं षष्टिकोटियोजनसमुन्नतम् । विस्तारः

CC-0. In Public Domain. Digitization by eGangotri

पञ्चाशत्कोटिपरिमितः । लक्षशतद्वयपञ्चाशत्कोटियोजनसंख्यया वर्तुलाकारेण ब्रह्माण्डमेकम् ।

"एतदण्डकटाहेन
तिर्यक् चोर्ध्वमधः क्रमात् ।
कपित्थस्य यथा बीजं
सर्वतो वै समावृतम्" ।। इति ।

सकलचेतनाधारमण्डं कपित्थस्य फलं बीजानीव प्राकार्यं समावृत्य तिष्ठति । तद्वत् सुवर्णकटाहेन पूर्वोक्तदेवासुरमानुषरूपसकलप्रपञ्चमावृत्य एतदण्डकटाहं कोटियोजनानां दलेनावृत्य स्थितं पृथिवीतत्त्वम् । दशोत्तरेण पयसा मैत्रेयाण्डं च तद्वृतमिति तदावृतं पृथिवितत्त्वम् । दशकोटियोजनानां दलेनावृत्य स्थितं जलतत्त्वम् । तदम्बुपरिधानोऽसौ वह्निना परिवेष्टितं तदावृतं जलतत्त्वम् । शतकोटियोजनानां दलेनावृत्य स्थितमग्नितत्त्वम् । वह्निश्च वायुना वायुर्मैत्रेयनभसावृत इति । तदावृतं वह्नितत्त्वं सहस्रकोटियोजनानां दलेनावृत्य स्थितम् । वायुतत्त्वं दशसहस्रकोटियोजनानां दलेनावृत्य स्थितम् । आकाशतत्त्वं भूतादिना नभसापि महता परिवेष्टितमिति, तदावृतमाकाशतत्त्वम् । शतसहस्रकोटियोजनानां दलेनावृत्य स्थितमहङ्कारतत्त्वम् । तदहङ्कारतत्त्वं दशलक्षकोटियोजनानां दलेनावृत्य स्थितं महत्तत्त्वम् । एवं प्रकृतिविकारपृथिव्याद्यावरणसप्तकं च दशोत्तरस्यावरणानि चेति वाक्यं गृहीतम् ।

एवं प्रकृतिसङ्गस्यामलरूपस्य देहिन इत्यनादिकर्मवासनारुचिभिः प्रकृतिवशगाः सन्तो देवतिर्यङ्मनुष्यादिशरीराण्यवलम्ब्य गर्भजरामरणादिक्लेशाननुभूय स्थितान् चेतनान् श्रीमन्नारायणः स्वस्य निर्हेतुकदयाकटाक्षसुधास्पर्शेन सदा-

CC-0. In Public Domain. Digitization by eGangotri

चार्यसंश्रयणं कारयित्वा तत्परिगृहीततया "लिप्यते न स पापेन पद्मपत्र-मिवाम्भसा" इति अस्पष्टसंसारगन्धो भूत्वा सर्पमुखलग्नमण्डूकवत् कोटिद्वय-लग्नाग्निकाष्ठमध्यस्थपिपीलिकावत् संसारस्थितिमतिदुःसहां मत्वा प्राप्यदेशे सुखानुभवं कदा करिष्यामीति गमनत्वरावतोऽधिकारिणः परमपदस्य दशाकाले श्रीवैकुण्ठनाथः नित्यमुक्तानाहूय पुरुशोभां कुरुतेति नियोजितवान्। तत्प्रकारेण "अलङ्कारविधिं कृत्स्नं कारयामास वेश्मन" इतिवत् श्रीरघुनायकस्य पट्टाभिषेकार्थं श्रीअयोध्या यथालङ्कृता तद्वत् सदानन्दमयं सर्वालङ्कारालङ्कृतं परं पदं माणिक्यमयस्तम्भशोभिताभरणैर्मुक्ता-दामभिर्गम्भीरपताकाभिरलङ्कृत्य धूपदीपदिव्यगन्धदिव्याञ्जनदिव्यचूर्णदिव्य-माल्यादिमङ्गलद्रव्याणि सर्वाणि सङ्गृह्य तदनन्तरमादिवाहकानाप्तवान्। ते च सुदर्शनशङ्खवर्णज्ञाननियम प्रियकार इति नामसंयुक्ताः विष्णुदूताश्च-त्वारस्ते च पूर्वस्निग्धजनवत् प्रत्यक्षं गत्वा तं गृहीत्वा गमनकाले बाह्यकरण-मन्तःकरणैः संयुक्तं कृत्वा अन्तःकरणं प्राणसंयुक्तं कृत्वा भूतसूक्ष्मविशिष्टोऽयं वासुदेवः तरुच्छायामाश्रित्य विश्रामं कृत्वा प्रयाणपाथेयं पुण्डरीकाक्षनाम-सङ्कीर्तनामृतद्वयमन्त्रमेव पाथेयं कृत्वा श्रीरङ्गराजं मार्गसहायं कृत्वा विरजातीरं तिलवृक्षं लक्ष्मीपद्मसरश्च विश्रामदेशं कृत्वा रत्नमण्डपमावा-सदेशं कृत्वा अर्चिरादिपुरुषान् सम्भाषणयोग्यान् कृत्वा प्राप्यदेशं कदा प्राप्स्या-मीति प्रीत्यतिशयेनानादिकालं स्वात्मानं विदन् कृतसंसारं नरकपुरमिव स्मृत्वा एकाक्ष्येककर्णिकादिराक्षसस्त्रीभिः सहवासं त्यक्त्वा लङ्कामध्यादुत्तीर्यागता सीतेव अयमात्मा च हृदयादुत्तीर्य "शतं चैका हृदयस्य नाड्य" इति तद्गतै-कोत्तरशतनाडीषु सुषुम्नेति नामसंयुक्तोर्ध्वनाड्या विद्यामाहात्म्येन च देवयान-स्मृत्या च प्रपन्नः हार्दपुरुषगृहीतदीपज्वालामिवानुस्मृत्य

"ओंकाररथमारुह्य मनःप्रग्रहवान्नरः।
विज्ञानं सारथिं कुर्यात्तद्विष्णोः परमं पदम्"।

CC-0. In Public Domain. Digitization by eGangotri

इतिवत् प्रणवमिति रथमारुह्य मनसि सारथ्ये कुर्वाणे सति गमनकाले द्रष्टुमशक्यादित्यमण्डलस्य एकः सूर्यवद् भेदनं कृत्वा अमृतात्मकचन्द्रसमीपे गत्वा तेन सत्कृतो भूत्वा स्थूलशरीरं विहाय सूक्ष्मशरीरमवलम्ब्य गमनसमय आदिवाहको भूत्वा चतुर्दिक्षु परिवेष्टनं कृत्वा आगमनसमये अर्चिरहः भुक्तपक्षः षण्मासाश्च संवत्सरो वायुः भास्करचन्द्रमसवह्निविद्युदु(द?)कानीन्द्रं प्रजानां पतिमिति एतल्लोकाधिदेवताः सत्कृत्य स्वसीमास्वप्रदेशपर्यन्तं सह प्रस्थितः। एतत्प्रकारेण गत्वा ब्रह्माण्डं च तदावृतं पृथिव्यादिमहत्तत्त्वानि भित्त्वा गमनकाले एकः मार्गोऽस्ति। तमुल्लङ्घ्य तदुपरि गमनकाले महासमुद्रास्त्रयः सन्ति। तानुल्लङ्घ्य तदुपरि गमनसमये पुण्यतीर्थो नद्यस्ति। तां नदीमुल्लङ्घ्य कियद्दूरं गमनकाले गते सति एको मोक्ष इति मार्गोऽस्ति तत्पूर्वोक्तमार्गेभ्यः शतगुणमधिको भूत्वा स्थितः। तमुल्लङ्घ्य कोटियोजनमुपरिगते सति पुण्यवृक्षसमाकीर्णो भूत्वाऽतिमनोहरो भूत्वा एकाश्रमभूम्यां भगवत्सङ्कीर्तनघोषः स्थितः। तदाश्रमं प्रविश्यानेकयोजने गते सति विष्णुलोकोऽस्ति। स विष्णुलोकः पूर्वोक्तसमस्तलोकेभ्यः सहस्रगुणितो भूत्वा स्थितः। स च अत्याश्चर्योऽत्युन्नतोऽतिशोभनोऽतिविचित्रनित्यनिरतिशयसुखार्हो भूत्वा नानारत्नखचितमाणिक्यमयस्तम्भशोभितहेमप्रासादादिभिः प्रज्वलितो भूत्वा विभवैरुपवनैरलङ्कृतो भूत्वा चतुर्द्वारसमेतो भूत्वा स्थितः। तद्द्वाराणां नामानि, आत्मसमष्टिः, प्रकृतिसमष्टिः, कैवल्यसमष्टिः, धर्मसमष्टिश्च। तत्पुरःस्थितिरूपेण स्थिताः अत्र मूलप्रकृतिविचयं कृत्वा स्थितवान्। एवंप्रकारेण महाशक्तियुक्तमूलप्रकृतेरुच्छ्वासनिश्वासयोः काले ब्रह्मणः प्रलयं सृष्टिश्च भवति।

CC-0. In Public Domain. Digitization by eGangotri

बोद्धा बोधमया सच्चासच्चेदं विश्वबुद्बुदम् ।
उदिता वा प्रलीना वा अविकाराय कल्पते ।।

इत्युक्ततयैतन्मूलप्रकृतिमाहात्म्यम् । एवं महासत्त्वयुक्तायाः मूलप्रकृतेः दिव्यतेज इत्यावर्तनं जाग्रत्तया उल्लङ्घ्य तल्लोकं त्यक्त्वा अर्चिरादिमार्गे कोटित्रययोजनानि गते सति पूर्वं स्वयं संसारे स्थितिसमये गमनमार्गे चान्धकारावृतो भूत्वा छायोदकेन रहितो भूत्वा 'भीतोऽस्म्यहं महादेव श्रुत्वा मार्गस्य विस्तर'मितिवत् श्रवणमात्रेणातिभीतियुक्तो क्रूरमार्गे यमभटानां पाशबन्धनैः पुत्रदारादिपाशबन्धबद्धो भूत्वा यमदूतैर्गृहीतो भूत्वा अधोमुखं कृत्वाकृष्य गमनसमये श्वानः जानुजङ्घामांसानि खादन्ति । शक्तिसंयुतामरसायकशूलमुद्गराद्यायुधैस्ताडयन्ति । व्याघ्रकङ्ककाकराक्षसमुखानामाहारो भूत्वा सर्वाङ्गरक्तयूपधारासंयुक्ते सति क्षुत्तृष्णातिशयेन यमदूतानन्नपानादिकं याचमाने सति ते निर्दयाः सन्तो नासिकां मुखमोष्ठं दन्तान् छित्वा हस्तपादयोर्भङ्गं कृत्वा सम्यग्बध्वा गात्रशोषणं कृत्वा गृहीतः गतसमये दुःखं निर्वृत्य सुखोत्तरमार्गे तत्तल्लोकाभिरामाभिः सर्वाभिः आगत्य तैरर्पितान् वित्तानुचितान् अङ्गीकृत्यातित्वरया गत्वा शब्दस्पर्शादिसिंहव्याघ्रानां मुखानुल्लङ्घ्य संसारमिति महाकुञ्जरमुत्तीर्य तापत्रयमिति कारागृहसंयुक्ततापनिवृत्यर्थं ततस्तु विरजातीरप्रदेशं संगच्छति । गत्वा ततो विरजां, विमुञ्चति तनुं सूक्ष्मम् । ततो"मानवस्पर्शाक्षालितवासना सुकृतिनो गच्छन्ति विष्णोः पदः"मितिवत् विरजामृतप्रवाहे स्नानं कृत्वा तन्नदीतरणं मनोवेगेन कृत्वा,

"प्रणवो धनुः शरश्चात्मा ब्रह्म तल्लक्ष्यमुच्यते ।
अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत्" ।।

इतिवत् विरजानदीमुत्तीर्य अश्वत्थवृक्षच्छायायां स्थितानाममानवानां श्रीहस्तस्पर्शात् सूक्ष्मशरीरं विसृज्य सूर्यकोटिरेककाले उदयान्वितो यथा, दिव्यशरीर-

CC-0. In Public Domain. Digitization by eGangotri

मवलम्ब्य चतुर्भुजो भूत्वा शङ्खचक्रगदाद्यनेकदिव्यायुधानि धृत्वा गर्भजन्मजरा-मरणादिदुःखानि क्षुत्पिपासाहङ्कारममकारदारिद्र्याशासूयारागद्वेषानादिकर्म-वासनादिरुचिं त्यक्त्वा भयरहितो भूत्वा लावण्ययौवनसौकुमार्यादिकल्याण-गुणगणाकरः शुद्धसत्त्वात्मकभगवदनुभवैकपरिकरविग्रहयुक्तः सन् कृतार्थो भूत्वा अमानवानां प्रदक्षिणं कृत्वा तेषामनुज्ञया तदुपरि लक्षयोजनानि गते सति एको महार्जुनवृक्षः षष्टिसहस्रयोजनविस्तीर्णः, लक्षयोजनोन्नतः। तस्य वृक्षस्य मूले चतुर्भुजं महातेजसं नीलमेघनिभप्रभं देवमनन्तं दृष्ट्वा दिव्यदेहं शुभावहं, एवं प्रभावसंयुक्तान् देवमानवान् संदृश्य तेषामनुज्ञया तदुपरि पञ्चाशद्योजनानि गते सति एका सर्वतीर्थेति नद्यस्ति। सा नदी शतयोजनविस्तीर्णप्रवाहा। तन्नदीतीरे सिद्धसार इत्येको वृक्षोऽस्ति। तस्य विस्तारः– सहस्रद्वययोजनानि उन्नतिः, षठिसहस्रयोजनानि विस्तीर्णः। तस्य वृक्षस्य मूले विष्णुमानवा इति दिव्यपुरुषाः सन्ति। तेषां प्रणामादिकं कृत्वा प्रदक्षिणमागत्य तेषामनुज्ञया तदुपरि षष्टिशतयोजनानि गते सति एका नदी शतयोजनविस्तारेण प्राकृतजलं वहतीति तामुत्तीर्य विशिष्टवेषे सति स एव सन् स्वयं यथा न प्रकाशते तथावस्थितिः तन्नदीस्नानेन भगवदैक्यज्ञानं च। दिव्यतेजसा एको मूर्तिमान् भूत्वा स्थितः। तद्दर्शनं कृत्वा तदुपरि शतयोजनानि गते सति एकलक्षविंशतियोजनानां विस्तारेण लक्ष्मीपद्मसर इत्येका पुष्करिण्यस्ति। तत्पुष्करिणीतटे लक्षयोजनोन्नतः पञ्चाशद्योजन-विस्तीर्णस्तिलवृक्षोऽस्ति। तस्य वृक्षस्य सम्बन्धेन तिलपुष्करिणीति प्रसिद्धिः। तत्पुष्करिणीसमीपं गत्वा स्नानं कृत्वा स्नानादनन्तरं निरतिशयसुखरूपनिरवद्यः सन् ज्ञानानन्दामलस्वरूपभगवद्गुणानुसन्धानमेव धारकपोषकभोग्यं कृत्वा स्थितिः। तदवस्थः सन् तिलवृक्षच्छायावस्थानसमये श्रीवैकुण्ठदिव्यपरिसर-वर्तिनः आनेतुमागताः अनेकप्रकारदिव्याभरणविभूषिताः दिव्यस्त्रियः,

CC-0. In Public Domain. Digitization by eGangotri

नवरत्नखचितहेमदण्डचामराणि गृहीत्वागताः शतसंख्याः । नवरत्नकीलित-हेमदण्डचामराणि गृहीत्वागताः स्त्रियः शतम् । नवरत्नखचितहेमदण्डसंयुक्त-व्यजनहस्ताः शतं स्त्रियः । सर्वाभरणभूषिता नर्त्तक्यः शतमागताः । कनकदीपान् गृहीत्वागताः स्त्रियः शतम् । मङ्गलाशासनपरा भूत्वा स्त्रियः शतम् । स्तुतिपशः स्त्रियः शतम् । लावण्ययौवनविलासपरिपूर्णा भूत्वा दिव्याम्बराणि धृत्वा वस्त्रव्यजनसंयुक्ताः स्त्रियः शतम् । दिव्यविचित्रनाना-पुष्पसंयुक्ताः स्त्रियः शतम् । पूर्णकुम्भदिव्यमाल्यश्रीचूर्णलाजादिमङ्गलद्रव्याणि गृहीत्वागताः स्त्रियः पञ्च शतानि । देवदुंदुभ्यादिदिव्यानि वाद्यानि वादयि-त्वागताः स्त्रियः शतम् । दिव्यगानसङ्कीर्तनवत्यः स्त्रियः शतम् । घण्डा-सहितपताका गृहीत्वा शतमागताः । दिव्यमाल्यादिधारणं कृत्वा अलङ्कार-समूहैरागताः स्त्रियो दशसहस्राणि । पुष्पवृष्टिकारिण्यः सहस्रम् । सामगानघोषं दिव्यप्रबन्धघोषं च कृत्वागता दिव्यपुरुषाः दशसहस्राणि । नवरत्नखचित-माणिक्यस्तम्भशोभितं मुक्तादामकिङ्किणीरणरणत्कारयुक्तं पताकासहितं दिव्य-विमानं गृहीत्वा गरुडस्यागमनसमये तं परिवेष्ट्य दिव्यविमानानि दशसह-स्राणि । महालक्ष्म्या निजमूलपरिकरदिव्यस्त्रीशतमागत्य तिलवृक्षपुष्क-रिणीतटस्थवृक्षमूले सकलतापरहितो भूत्वा स्थितं मुक्तात्मानम् अनादिकाल-संसाररोगभुक्तो भूत्वा तन्निवर्तितपुत्रं (?) आरोग्यस्नानं कारयन्त्यो यथा मातर-स्तद्वत् मुक्तात्मानमभिषिच्य दिव्याम्बराणि परिधाय दिव्यभूषणैरलङ्कृत्य दिव्यमाल्यान्यवधृत्य दिव्याञ्जनदिव्यचूर्णैरलङ्कृत्य कैङ्कर्यपट्टाभिषेकं कृत्वा कर्पूरारतिं समर्प्य पुष्पकोपर्यारोप्य समुद्रघोषवत् वाद्यध्वनिं कृत्वा सामगान-दिव्यप्रबन्धानुसन्धानकरणकाले आशानिवृत्तो भूत्वा सर्वेन्द्रियाणि जित्वा अण्डाद्यावरणानि भित्वा अनन्तलोकानुल्लङ्घ्यागतो महाशूर इति सर्वैरुच्चैः स्तूयमानः सन् श्रीवैकुण्ठसमीपं गत्वा तत्समये अत्युज्ज्वलगोपुराणि हेममय-नवरत्नखचितरूपश्रीप्राकारश्चातिमनोहरोऽत्युन्नतोऽवाङ्मनसगोचरो विविधा

CC-0. In Public Domain. Digitization by eGangotri

विचित्रसंयुक्तप्राकारनिबद्धा घण्टाश्च पताकाश्च आत्मानं उद्देश्यप्राप्यदेशोऽयमेवागच्छ आगच्छेति हस्तान् प्रसार्याह्वानवन्तो नृत्यन्ति ।

इरुप्पडुंवैकुण्ठं तद्गोपुरद्वारं प्रविश्य "वैकुण्ठदिव्यनगराय नमः" इति प्रणामं समर्प्य द्वारे स्थिताः मुडितुडवान्नर इति दिव्यपुरुषाः सन्ति, तान् प्रति नमस्कृत्यागते सति अनेकलक्षप्राकाराश्चोद्यानानि वनानि च माणिक्यमरकततोरणानि मुक्तामयमण्डपानि वीरसिंहासनानि केलिमण्डपसहिताः वीथीः प्रविश्य कोटियोजनगमनानन्तरं महाप्राकार इति, एकरूपमिति प्राकारश्च तिरुक्कुडचंड इति एकः प्राकारश्च, वैजयन्तीत्येकः प्राकारः, त्रिविक्रममित्येकः प्राकारः, पुष्यराग इत्येकः प्राकारः, एकः प्रवालप्राकारः, नवरत्नखचित एकः प्राकारः, इन्द्रनीलमाणिक्यप्राकाराश्च, मौक्तिकप्राकारश्च, मलयानिलप्राकारश्च, चक्रप्राकारः, क्षीराब्धिः इत्येकः प्राकारः, एको माणिक्यप्राकारः, अनन्त इत्येकः प्राकारः इत्यादि शतसहस्रावरणानीति श्रुत्युक्तप्रकारेणात्युन्नताः गोपुरद्वारादिषु स्थिताः ।

प्राकारे अनेकतलद्वारेषु स्थितानां पुरुषाणां नामानि तपोधना इति तीर्थपुरनिरता इति च तिरुमालडिपार्वल इति च मधुविरुधुनामुडिमाधयुतमर इति च गोविन्दताण्डवर इति श्रीवैकुण्ठदास इति च जयमुडिमान् इति च तत्त्वयडिनविलयु इति वेदं च पुरारीति च शङ्खनिधिपद्मनिधिरिति च मकरिताण्डवरिति च मुडितोंड इति च अवहृतोंड इति च नैत्रमणिमुडिमाधयु इति च तलश्रीद्वारेषु सन्तः, भूतभविष्यद्वर्तमान ईश्वरश्च लीलाकारणविनोदसृष्टिस्थितिसंहारान् ज्ञात्वा, सर्वज्ञा भूत्वा तिष्ठन्ति । तान् नमस्कृत्य वीथीः प्रविश्य अनेककोटियोजनगतसमये विविधविचित्रवस्त्रालङ्कारान् मुक्तामयरङ्गवल्लीकनकविचित्रपात्राणि च पूर्णकुम्भाश्च नवरत्नखचितहेमपात्रेषु मङ्गलारतिं

CC-0. In Public Domain. Digitization by eGangotri

संस्थाप्य स्वस्वगृहद्वारप्रवेशसमये आरात्रिकं कृत्वा आशिषः कृत्वा हस्तान् प्रसार्य स्तोत्राणि कुर्वन्ति । केचित् नृत्यन्ति । केचन गायन्ति । सन्तोषातिशयेन निर्विकारा भूत्वा सन्ति केचन । अस्मिन् समये विष्वक्सेनादिनित्यवर्गाश्च सर्वे स्वात्मगृहान् प्रतिगृहीत्वा गत्वा दिव्यसिंहासने संस्थाप्य निम्नस्थाने स्थित्वा नवरत्नखचितपात्रं निधाय कनककलशैर्वासितोदकमादाय स्वभार्या-सहिताः पादप्रक्षालनं कृत्वा प्रोक्षणं कृत्वा पूजनं च कृत्वा दिव्यगन्धानुलेपनदिव्य-माल्यादिभिरलंकृत्य धूपदीपमधुपर्कनैवेद्यताम्बूलाद्युपचारान् कृत्वा कर्पूरारतिं कृत्वा व्यजनं समर्प्य तत्तीर्थं स्वीकृत्य अस्मद्देशस्यैकनायकरत्नं लब्धमिति स्वस्वभार्यां प्रति उक्त्वा उपलालनं कृत्वा प्रोक्षिते सति गत्वा मणिमण्डपसमीपं गत्वा पुष्पकादवतीर्य "आनन्दमयाय दिव्यरत्नमण्डपाय नमः" इति दण्डं समर्प्य स्थिताः ।

मणिमण्डपप्राकारः किंविशिष्ट इति चेत्, देदीप्यमानमाणिक्यस्तम्भाः अनेककोटयः विविधविचित्रशिल्पयुक्ताः वज्रवैडूर्यसोपानपङ्क्तियुक्ताः । अनेककेलीमण्डपानि च । कमलकल्हारनीरजादिपुष्पयुक्तसरांसि च । वीर-सिंहासनानि च । कल्पवृक्षादितरुसमूहयुक्तश्रृङ्गारपुष्पवनानि च । तद्वनेषु स्थितानां शुकपिकादिपक्षिसंघानां मृदुमधुरालापानन्दकरं भूत्वा अतिमनोहरं भूत्वा दिव्यतेजोरूपं भूत्वा पञ्चोपनिषन्मयं भूत्वा अतिसुखावहमवाङ्मन-सगोचरं सकलसम्पत्समृद्धं भूत्वा अनन्तकोटिब्रह्माण्डेषु स्थिता आत्मकोटयः एककोणस्यापि न पूरणक्षमविशालतासंयुक्ताः । एवंभूतं सनत्कुमारसनक-सनन्दनादिपरमयोगीश्वराणां च ब्रह्मेन्द्रादिदेवतानां च ध्यातुमत्यन्तदूरमितिवत् स्मरणस्य गोचरं भूत्वा स्थितं "तद्विष्णोः परमं पद"मिति च "सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिते"ति "ते ह नाकं महिमान" इति "जगदा-दिरनादिस्त्वं जगदीशं च ईश्वर"मिति वैकुण्ठभोगनायकस्थितमणिमण्डपमध्ये

CC-0. In Public Domain. Digitization by eGangotri

स्थितमेककारणयोगपद्यमस्ति। तत्पद्मस्य ज्ञानबलैश्वर्यशक्तीति चतुष्टयान्दोलनविज्वरा(?)भूत्वा सन्ति। तद्गुणानामुपरि विमला उत्कर्षणी ज्ञानं क्रिया योगा प्रभ्वी सत्या अनुग्रहा ईशाना एता नव शक्तयश्चामराणि गृहीत्वा तिष्ठन्ति। अनुग्रहे लक्ष्मीसमाना अष्ट महिष्यस्तिष्ठन्ति। तन्मध्ये कर्णिकायामनन्तानेकचन्द्रमविग्रहवत् शैत्यसंयुक्तशरीरा भूत्वा कल्याणगुणनामाश्रयतया सर्वविधकैङ्कर्येषु चाधिकृता सन्तः। कैङ्कर्याणामुत्तमपङ्क्तिवत् स्थितः अनपायानन्त इति च शेष इति नामान्यवलम्ब्य भगवदनुभवप्रवाहप्रकाशार्थं सहस्रवदनानि द्विसहस्रजिह्वासंयुक्तः सन् नानामिलितपरिमलसौरभेन श्रमहरो भूत्वा सुखतरो भूत्वा अतिमनोहरो भूत्वा मन्दानिलसेव्यो भूत्वा अतिशोभितोऽत्युन्नतोऽनुपमो भूत्वा स्थितः शेषोऽहिः स्वशरीरं त्रिवलयवलितं कृत्वा स्थितः। सिंहासनं च द्वात्रिंशल्लक्षयोजनदीर्घं च दशलक्षयोजनोन्नतं च। विंशतिलक्षयोजनविशालतासहितो भूत्वा एककाले सहस्रसूर्योदयवत् सहस्रफणमणिज्योतिर्मण्डलमध्यस्थितशय्योपरि सकलजगदुदयस्थितिसंहाराणां कारणं भूत्वा अवाप्तसमाप्तकामो भूत्वा श्रियः पतिर्भूत्वा श्रीपुण्डरीकाक्षो भूत्वा श्रीकौस्तुभादिदिव्यभूषणभूषितो भूत्वा शङ्खचक्रगदाशार्ङ्गाद्यसंख्येयदिव्यायुधधरो भूत्वा आश्रितवत्सलो भूत्वा कारुण्यनिधिर्भूत्वा स्थितः दिव्यज्योतिर्मयः।

श्रीवैकुण्ठनायकस्य वामभागे अपरिमितदिव्यसौन्दर्यसौकुमार्यसौशील्यादिदिव्यकल्याणगुणसमृद्धा भूत्वा बाल्ययौवनमध्यस्था भूत्वा दिव्याम्बरदिव्यगन्धानुलेपनदिव्यमाल्याद्यलङ्कृता भूत्वा स्थिता महालक्ष्मीश्च। दक्षिणपार्श्वे तस्याः प्रतिबिम्बरूपे क्षमादिगुणैर्लक्ष्मीमतिशयित्वा दक्षिणे पार्श्वे भूनीले स्थिते। लक्ष्म्याः भूनीलयोर्मध्ये वामपादं कुञ्चयित्वा दक्षिणपादं प्रसार्य भोगासने स्थिते सति श्रीअनन्तपार्श्वस्थमुखारविन्दे दिव्यगन्धमास्वादयन्

CC-0. In Public Domain. Digitization by eGangotri

अनन्तस्यापि सर्वेश्वरस्य मुखचन्द्रमण्डलामृतधारा एव स्वस्य धारकपोषक-भोग्यरूपानङ्गीकृत्य सौरभ्यादिकल्याणनिधिर्भूत्वा स्थितः परमपदनायको मुक्तात्मानमानेतुम्। विष्वक्सेनादिनित्यवर्गश्च, चण्डःप्रचण्डश्च भद्रः सुभद्रश्च, जयो विजयश्च, धाता विधाता च, कुमुदः कुमुदाक्षश्च, शङ्कुकर्णो सर्वनेत्रश्च, पुण्डरीको वामनश्च, सुमुखश्च प्रतिष्ठितश्चेति अष्टदिक्पालकाश्च [illegible] अन्तरङ्गपरिकरदिव्याप्सरसश्च। मङ्गलद्रव्याणि गृहीत्वा निर्मानमण्डप[illegible] स्थितं मुक्तमूर्तिं समर्पयित्वा अनेकविधिपूर्वकलालनं कृत्वा तं गृहीत्वा ईश्व[illegible] निकटे संस्थापनानन्तरं दिव्यज्ञानप्रसादलब्धो भूत्वा "समस्तपरिवारा[illegible] श्रीमन्नारायणाय नमः" इति दण्डप्रणामं समर्प्य हर्षपरवशानन्दनिर्भरो भूत्वा पुनः पुनः दण्डवत्प्रणामं समर्प्य अतिप्रीत्या गत्वा पादपीठे पादं निवेश्य स यदि दिव्यसिंहासनारोहणकाले समीपं दृष्ट्वा "अवाक्येनादर"इतिवत् आकारं त्यक्त्वा चन्द्रोदयदर्शितसमुद्रवद् विकृतो भूत्वा स्वात्मानं विहायानन्त-कालभोग्यदुःखं सर्वं निवर्तयितुं "अङ्के भरतमारोप्ये"तिवत् श्रीभरतमक्रूरमिवा लिङ्गनं कृत्वा प्रीत्यतिशयेन कोऽसि त्वमिति पृच्छति सति अहं ब्रह्मास्मीत्यहं महाराजकुमार इत्युक्ते, अनन्तरमेतत्पर्यन्तं किं कृतवानित्युक्ते शब्दादिभोगमेव कालक्षेपमिति स्थितः। तद्भोगफलेन किं दृष्टमित्युक्ते, स्वामिन्! निर्हेतु-कदयोत्तीर्णोऽस्मीत्युक्तम्। उत्तीर्य पुनः किं करिष्यसीत्युक्ते तव जायमान-कृपाकटाक्षतया अभिमुखोऽस्मीत्युक्तम्। तदुपरि किं करिष्यसीत्युक्ते तत्र सेवाङ्गीकृता इत्युक्ते वस्तुतस्तु "आचार्यः स हरिः साक्षाद् गुरुरूपी न संशयः" इतिवत् त्वमेव सदाचार्यो भूत्वा आश्रयणयुक्तं कृत्वा इदं दर्शयित्वा त्वयैवाङ्गी-कृत इत्युक्तमिति वचनानन्तरं ईश्वरोऽपि मम सृष्टिव्यापारः सफलो जात इति प्रीतो भूत्वा, त्वं नरकानुभवं कृत्वा दुःखितो भूत्वा स्थितसमये

CC-0. In Public Domain. Digitization by eGangotri

अहमागत्य मुखदर्शनमात्रमपि न कृतं इन्द्रियपरवशो भूत्वा महाक्लेशादित्युपलालित्य "प्रगष्टस्य यथा लाभः" इतिवत् ममालभ्यं लब्धं तवागमनेनायं देशः सनाथो जातः, अस्य स्थानस्य एकं नायकरत्नं लब्धमिति देशान्तरगतो भूत्वा "गन्तुं पुत्रं पितावद् उपलालित"वत् (?) कृपां कृत्वा अतिव्यामोहं कृत्वा महालक्ष्मीहस्ते दत्तं, "कंसवधानन्तरं श्रीकृष्णं दृष्ट्वा देवकी"वत् स्तन्यमुद्बोध्य सर्वाङ्गमभिषिच्य उद्धृत्यानेकचिह्नैरुपलालनानन्तरं कृतार्थो भूत्वा महालक्ष्मीदयया सर्वविधकैङ्कर्यं च कुर्विति नियोगकरणानन्तरं पर्यङ्कादुत्तीर्य अभिमुखो भूत्वा दिव्यसौन्दर्यमनुभूय लावण्यप्रवाहस्य सम्मुखे स्थानुपशस्यतया षष्ठभागं प्रत्यागत्य अपराङ्गसौन्दर्यं सर्वमनुभूय पुर्वाङ्गादनवधिकाद् अपराङ्गकलहमितिवत् पुनः सम्मुखे प्रत्यागतः सौन्दर्यतरङ्गेण तद्वशचित्तवृत्तिर्भूत्वा अञ्जलिं गृहीत्वा प्रदक्षिणं कृत्वा नमस्कृत्य विस्मितहृदयो भूत्वा तत्परो भूत्वा हो हो अहो उहा अहमन्नमहमन्नमिति आनन्दपरवशो भूत्वा स्थितसमये श्रीवैकुण्ठनायकश्च स्वस्य कृपाकटाक्षवीक्षणैरीषत् स्मितपूर्वकं स्निग्धगम्भीरमाधुर्यश्रीसूक्तैः समीपमाहूय स्वस्य श्रीपादकमलेन तस्य उत्तमाङ्गमलङ्कृत्य नित्यकैंकर्यनियोगमवधारितवान् । महाप्रसादतया सर्वकालसर्वदेशसर्वावस्थास्वपि सर्वविधकैंकर्यं कुर्वन् कृतार्थो भूत्वा तिष्ठतीति ।

इत्यर्चिरादिमार्गवैभवं सम्पूर्णम्

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

PART - B

Vol. XXII Part - II

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

Trivandrum Sanskrit Series No. 247

General Editor:
Dr. K. Raghavan Pillai
Director and Professor of Sanskrit

KRTYARATNAVALI

OF
RAMACHANDRA

Edited by
S. Muralidharan Nayar

Published by
THE ORIENTAL RESEARCH INSTITUTE
AND
MANUSCRIPTS LIBRARY
KARIAVATTOM, TRIVANDRUM.
1154/1978

CC-0. In Public Domain. Digitization by eGangotri

Sanskrit:

Kṛtyaratnāvali of Ramachandra

Edited by:

S. Muralidharan Nayar

Published by:

Dr. K. Raghavan Pillai

Director and Professor of Sanskrit

General editor, Trivandrum Sanskrit Series

ORI Mss. Library

University of Kerala

Kariavattom, Trivandrum

Published in December 1978

No. of Copies: 250

Price Rs. 12/-

Printed at Vijnanabhvan Printers,

Manacaud, Trivandrum-9

CC-0. In Public Domain. Digitization by eGangotri

अनन्तशयनग्रन्थावलिः — २४७

सर्वप्रसाधकः डाक्टर्. के. राघवन् पिळ्ळ

पौरस्त्यभाषागवेषणहस्तलिखितग्रन्थप्रसाधनकार्यालयः

केरलविश्वविद्यालयः

कृत्यरत्नावली

रामचन्द्रविरचिता

प्रसाधकः

एस्. मुरलीधरन् नायर्

११५४/१९७८

अनन्तशयने विज्ञानभवनमुद्रणालये मुद्रिता

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

CONTENS

		Page
1	Preface	1
2	Introduction	1—25
3	Index	1—13
4	Kṛtyaratnāvali	1 - 234
5	Appendix I (works)	235—240
6	do II (authors)	241—243
7	do III (vratas)	244—245
8	do IV (zod-con.)	246—247
9	do V (festivals)	248—
10	do VI (rituals)	249—250
11	do VII (observances)	251—253
12	References	1—6

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

PREFACE

We are now issuing the Kṛtyaratāvali, a work on Dharmasâstra composed by Rāmacandra in 1649 A. D, as number 24, in the Trivandrum Sanskrit Series.

The task of preparing an edition of the work from four paper manuscripts in our possession, was entrusted to Shri. S. Muralidharan Nayar Assistant Research Officer of this Institute. It is hoped that this lucid work will be an addition to the world of Sanskrit literature, and that the Scholars of Dharmaśastra will appreciate it as an authoritative source of old as well as modern festivals, rituals and the religious observances of India.

ORI and MSS. Library
1-12-78.

Dr. K. Ragavan Pillai
Director and Professor of Sanskrit,
General Editor, Trivandrum Sanskrit Series.

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

INTRODUCTION

Kṛtyaratnāvali is the 247th number of the renowned Trivandrum Sanskrit Series, we publish with the object of bringing out the profound knowledge of our ancient writers lying hidden in the old manuscripts, of which a sizeable number is deposited in this institution. This work is included in the list of works on Dharmaśāstra, in the *History of Darmaśasra written by P. V. Kane. Through this, the author Rāmacandra exposes and explains tithikṛtyas (Religious observances to be conducted according to lunar days) beginning from the first day of the caitra month to the end of phālguna. He also mentions some of the kṛtyas, which have to be done in the Malamāsas, in the last three pages of the work. Malamāsa, is an intercalary month, in which religious ceremonies are not performed. But Sahasrāmśupùja (sun worship) is very important in this month.

Rāmacandra, author of this work, was a versatile genius, who had a very deep knowledge in all branches of sanskrit literature, especially in Purànas, smṛtis and Dharmaśàstras.

Dharmaśástra - its source:

Vedas are the sources of Dhrmaśástra. Goutama in his Dharmasùtra says - "Veda is the sources of Dharma and the tradition and the practice of those that know it"[1]. Ăpastamba says - "The authority for the Dharma is the agreement of those that know the Dharma and the Vedas"[2], Manu puts down five different

*. History of Dhrmaśàstra. Vol. I. Page. 536

CC-0. In Public Domain. Digitization by eGangotri

sources of Dharma[3] - (1) The whole Veda is the main source of Dharma (2) the tradition; (3) the practice of those who know it; (4) the customs of Virtuous men; and (5) self satisfaction.[4] Yâjñavalkya explains:— Revelation, tradition, the customs of goodmen, what is agreeable to one's self and desire born of due deliberation are the recognised source of Dharma[5]. Authors of Dharmaśâstra quote passages from Vedas in support of the rules laid down by them in their works. We can see vedic quotation in almost all works on Dharmaśâstra. This also strengthens the above fact.

Kṛtyaratnāvali — A study:

Is is already noted that Kṛtyaratānavli is a work on Dharamaśātra. There are numerous works written by many authors on this subject. As to the method adopted by the author, it is of a peculiar nature. It is a prose work with verses interspersed in large numbers. Citations and quotations from different Purâṇas, Smṛtis, Itihasas and other works on Dharmaśâstra are abdundantly added. Authors and works are quoted to persent their views as also to refute their opinions. A detailed study of rituals, religious observances and festivals is conducted, considering all aspects of the concerned item. The prose is very simple but it is as effective as in any first class work of Sanskrit literature on śâstras.

Contents:

Kṛtyaratnāvali begins with the author's introduction of himself as Ràmacandra, son of Bhaṭṭaviddala[6]. Kṛtyas (rituals, religious bservances etc) are explained from the first day(Pratipad)of the dark half of Kṛṣṇapakṣa) of the Caitra month to the end of Phālguna month. In addition

CC-0. In Public Domain. Digitization by eGangotri

to this, Kṛtyas connected with Mahâlayas, Śivarātri, Mahānavami and Malamāsa are also defined in detail on separate topics. As Kṛtyas are explained on the basis of tithis (lunar days) it is clear that the author has accepted lunar months (Cándramāsa) for his narration, from among the four kinds of months famous in Astrology. They are Soura, Sāvana, Chāndra and Nakṣatra[6]. Astrology has a prominent place in fixing up of auspicious time and date of the Kṛtyas. It is the conception not only of the ancients but also of the man of the present world that if he takes a holy dip in the Ganga in an auspicious time, it will surely wash out his sins and will bring him relief from deadly diseases and mental uneasiness. This is what Padmapurāṇa says:—

चौत्रे मासि महाबाहो! पुण्या प्रतिपदा परा।
तस्यां यः श्वपचं स्पृष्ट्वा स्नानं कुर्यान्नरोत्तमः ।।
न तस्य दुरितं किञ्चिन्नाधयो व्याधयो नृप !
भवन्ति कुरुशार्दूल ! तस्मात् स्नानं समाचरेत् ।।

Hence it is clear that the time of an observance or ritual is as valid as the observance or ritual by itself. Vratas, Śráddhas, Homas or Pûjas are directed to be undertaken in the prescribed time and also in the prescribed manner. Even from the Vedic period festivals, rituals and other observances were performed in accordance with the position of various heavenly bodies by utilising the knowledge of astronomy. Thus solar and lunar months became widely accepted from the olden days. Some festivals are performed on the basis of seasons also. The following chart shows the seasons, months with their counterparts in English.

CC-0. In Public Domain. Digitization by eGangotri

Vasanta	Caitra	March, April
	Vaiśākha	April, May
Grīṣma	Jyeṣṭha	May, June
	Āṣāḍhā	June, July
Śarad	Āśvina	Semptember, October
	Kārtika	October, November
Hemanta	Mārgaśīrsa	November, December
	Pauṣa	December, January
Śiśira	Māgha	January, February
	Phālguna	February, March

Lunar days are called tithis and solar days are called vāras. Vāras are named after the planets - Sun, Moon, Mars, Mercury, Jupitor, Venus and Saturn.

In Kṛtyaratnāvalī a large number of vrtas, rituals and other observancs has been explained with details of time and practice. Short notes on some of them are given below:—

1. Anaṅgavrata — This Vrata ts to be observed on the 13th of the bright half of the Caitra month An idol of Madanais to be made of Sandal and worshipped. This may bring one propsperity along with sons and grandsons.

2. Anatavrata — This is to be observed on the 14th of the bright half of the Bhādrapada month.

3. Amuktābharaṇavrata — This also is to be observed in the Bhādrapada month. 7th of the bright half of the above month is the auspecious time for it.

CC-0. In Public Domain. Digitization by eGangotri

4. Aśūnyaśayanavrata — It is observed on the 2nd day of the dark half of each of the four months —śrávaṇa, Bhâdrapada, Āśvina and Kârtika[7]. It is included in the Candrodayavratas — i.e. the Vratas, which are performed during the time of moon rise.

5. Upâñgalalitāvrata — This vrata is very famous in South India and is observed on the 5th of the bright half of the Āśvina month. One who undertakes this vrata, has to clear his teeth with sticks and to take bath in a river or a lake.[8] Then he has to make a beautiful dais on which a golden idol of the goddess is to be consecrated and worshipped[9]. It may give a man knowledge, health, happiness and cows, to a woman a long married life, and to a girl a good husband[10].

6. Kārtikavrata - It is intended to get relief from the sins committed in the past seven births and to get issues in all generations[11]. Mahāviṣṇu is the deity to be worshipped in this vrata. Jāgaraṇam (waking during night) Dānam (Charitable giving) etc also have to be done during this Vrata.

7. Kokilāvrata - It is exclusively undertaken by women. It starts on the fullmoon day of Āśvina and continues to the end of śrāvaṇa.[12] The women should observe brahmacarya and take food only in the night. Floor alone should be used for bed[13].

8. Kojāgaratvratā Fullmoon day is the auspicious time for this vrata. It is called Kaumudi. Lakṣmi and Indra mounted on Irāvata are the deities to be worshipped. Dice is to be played in the company of charming women without sleeping in the night[14],. One who keeps awake and plays dice in the night is the blessed andGoddess Lakṣmi will make him wealthy[15]. Playing dice with only drinking coconut water is said to be highly rewarding.

CC-0. In Public Domain. Digitization by eGangotri

9 Govatsadvādaśivrata - Twelth of the dark half of Kārtīka is the time to undertake this vrata. Rice with blackgram is the only food permitted and that also only in the night. Cow, having a calf of the same colour is to be worshipped with sandal, flowers and so on, and mantras should be chanted with devotion. One who observes this vrata, will fulfil all the ambitions.

10 Gaurīvrata - It is being conducted on the 4th of the bright half of Jyeṣṭha, because Uma is said to born on that day[16]. Giving gifts, dancing, singing, condcting Homa, etc. are the main characterstics of this vrata.

11 Cāturmāsyavrata - This vrata begins on the 11th of the bright half of the Āśvina month and ends on the 12th of the dark half of Kārtika[17]. During these four months, the one who performs the vow has to worship Viṣṇu with a vow that he would do it with utmost devotion and without any interruption which might cause even death to him. Oil, molosses, fruites, pan, vegetable leaves etc. are to be avoided. By doing so he would become, handsome, sweet voiced, wise and so on. If one takes ghee, curd and butter along with food with devotion to cow, one will be the owner of many cows[18]. This vrata may bring many achievements to one, who undertakes it with devotion to Nārāyaṇa.

12 Candraśaṣṭhivrata—The 6th of the dark half of the Bhādrapada month is the time for undertaking the Candraśaṭhīvrata[19].

13 Cāndrāyaṇavrata— From the beginning to the end of the full moon day in the Māgha month, is the period of Cāndráyṇavrata, During this vrata, brâhmaṇa should eat roots. If he does not do so he is to go to hell. Kṣatruya Vaiśya and śūdra will also be the same[20]. Generally roots should not be used with liquor.

CC-0. In Public Domain. Digitization by eGangotri

Janmāṣṭamīvrats (Kṛṣṇāṣṭmi) - The 8th day of the dark half of the Srāvana month is Janmāṣtami. If it is calculated by Pūrṇimāntamāsa (Púrṇima - Fullmoon day) it is the 8th day of the dark half of the Bhādrapada month. Though these and other calculations may differ, the time is the midnight when the moon rises above in the sky. Puja is to be performed in this time every year. This Vrata is very important because this may fulfil all wishes[21].

During Kṛanāśtamīvrata, fasting is considered highly beneficial. It is said, that if one takes food during this time, it is sure that he partakes the sins that have accumulated in the three worlds[22].

Tiladvādaśīvrata -The time of this vrata is the 12th of the dark half of Māgha. It is said that Yama had produced tilas (gingily) on that day after doing a severe penance[23]. Hari is the deity to be worshipped on that day, using tila for homa, dāna, dípa, etc.

Dadhivrata-This vrata is a part of cāndrāyaṇavrata, and is being undertaken in the 2nd (Bhādrapada) of the four months, the first of which is śrāvaṇa[24]. During this month Dadhi (curd) should not be used for food[25].

Dugdhavrata-This vrata is observed on the 12th of the bright half of Bhādrapada. Milk, and food mixed with milk should not be used during this vrata. But ghee, curd, etc., could be used.

Dúrvávrata- The 8th day of the bright half of Bhàdrapda is Dúrvāṣtami. During this time women undertake this vrata to achieve a pleasant and long married life[26]. Liṅga (Sivaliṅga) should be pleaced

CC-0. In Public Domain. Digitization by eGangotri

on the ground where Dûrva has grown and worshipped, according to the System. They could also do the worship in other auspicious times. But in all tunes of Puja they could only eat the rire, which was not cooked by fire. Curd, fruits, etc., could be taken with honey[27].

19 Dūrvāgaṇapativrata - It is being undertaken on the 4th of the bright half of the Śrāvaṇa month. Gaṇapati is worshipped on that day.

20 Dvidalavrata - This is a part of the Cāturmāsyavrata and is to be undertaken in the 4th month of Cāturmāsya. Viz. Kârtika. Dvidala – is directed not to eat during this month.

21 Navarātravrata – This vrata begins on the first of the bright half of Äśvina. Devi is worshipped during these nine days, in every home, town, village and even in forests[28]. All are entitled to worship Devi in Navarātra, without considering the caste, creed or anything. Brāhmanas, Ksatriyas, Vaiśyas, Ŝûdras and even Mlechas and others are to perform this Pûja of Devi, with devotion and pleasure[29]. Women also should perform this vrata.

The importance of Devîpûja during Navaratrāvrata, is elaborately explained in this work. Everyday after the daily performance of Puja, Devīmâhàtmyam is to be read or heard by the Worshipper. Durgâmantra is to be muttered with devotion. Kumarīpûjanam (explained in another topic) is to be performed according to the methods from the first day of the vrata. One girl or even nine girls of the prescribed age, could be selected for this puja[30].

As part of Navarātrapùjă, the King is to perform Aśvapüjà

CC-0. In Public Domain. Digitization by eGangotri

Gajapüja, Râjacinhapûjà an so on. Horses and elephants with their ceremonial housings, should be made to parade in the town, with men playing musical instruments and drums[31]. Chhatra, Cãmara, Khadga, Simhãsana, etc. are to be worshipped seperately muttering seperate mantras. Everyday during this vrata, the King has to bestow gifts such as materials for hairdressing (I day) Silken tape (2nd day) Tilaka (3rd day), etc. till the 8th day. On the nineth day the worship of Candâ takes place.

If a woman who undertakes this vrata, happens to get mensturation, she should ask somebody else to perform the Pujà for her sake[32].

22 Nàgavarta-This vrata and pújà are to be performed on the 4th day of the bright half of Kãrtika eveay year. Śankhapála and other serpants, Ṣeṣa, the great serpant are to be worshipped during the Pùjâ with offering flowers, milk, etc. It is said that no snake will kill the man who performs this Pùjâ and that all effects of poison will vanish from him[33],

23 Nirjalaikâdaśîvrata - This is to be observed on the 11th of the bright half of Jyeṣtha. On this Ekadaśi, fasting is undertaken even without drinking water. Water pots filled with molasses are presented to brahmins on this day.

24 Nṛsimhavrata. The 4th of the bright half of the Vaiśakha month is Nṛsimhajayanti. This day is said to be the day on which Mahãviṣṇu took his 4th íncarnation as Nṛsimha to kill the demon king Hiranya[34]. Tins Vrata consisting of Púja, Samkalpa, Upavása etc is

CC-0. In Public Domain. Digitization by eGangotri

to be performed with utmost devotion. Night Should be spent listering to purāṇa recitations, singing songs and playing musical instruments. Next morning after the performance of Pùja brahmins should be fed and presented with idols of lion and cow made of gold and silver respectively. Landed property also should be given to them. After all these functions, the worshipper is permitted to lunch with his relatives. All people of the four castes are entilted to observe this Vrata[35].

25 Payovrata – This is a part of the Cāturmāsyavrata, as already noted above. During this month, milk should not be used by the worshípper.

Brahmasāvitrivrata – This Vrata is to be performed for three nights from the 13th of Bhàdrapada to the fullmoon night. Fasting during these nights, is the main observance[36].

26 Mahālakṣmîvrata- This Vrata begins on the day when the star Jyeṣṭha falls in the bright half of the Bhādrapada month and ends on the 8th day of the dark half of the same month. The peculiarity of this varta is that it begins and ends during the time of moon's rising in the respective nights.

27 Rāmanavamivarta-The ninth of the bright half of Caitra is called Rāmanavami. It is very auspicious if it becomes combined with the star Punarvasu in the midday[37]. Pùjä is conducted in the noon and also waking up in the night. Next morning homa, giving feast to brahmins and other functions take place. An idol of Rāma is placed in the middle of the ṣatkoṇa. Kausalya ànd Daśaratha are to be worshipped there itself. Hanuman, Sugrīva and

CC-0. In Public Domain. Digitization by eGangotri

such others are to be worshipped beyond the Ṣaṭkoṇa and in the middle of Aṣṭadalakamala. Next day after conducting the Pûjā and homa, Rāma's idol should be given away to Brāhmaṇa. Tracts of land also should be donacted to Brahmins.

28 Rambhāvarta-The third of the bright half of Jyeṣṭha is the day on which Rambhāvrata is conducted[38]. This vrata is undertaken in the third of the bright half of the Mārgaśirṣa month also[39]. I is called Rambhāvrata, because Rambhā, the clestial nymph took this vrata for prosperity[40].

29 Vaṭāsāvitrīvrata - This vrata begins on the full moon day of the Jyeṣṭha month. Women who undertake this vrata, have to water the fig tree with great reverence after taking bath themselves. Then the stem of the tree should be covered with thread and, flowers and such other things should be placed around it. Only a single meal in the night is allowed for one year for the worshipper[41].

This pûjá is to be continued in every week till the next Jyaṣṭha month, when the women have to spend the dvādaśi (12th day) taking only a small quantity of food in the day time. Next three days are to spend conducting püjas and fasting. On the 4th day after pujas and other observances, Brahmins should be fed to their full satisfaction. Then only the women are allowed to take meals themselves.

Worshipping of Sàvitri's idol is the main function of the püjā. The idol made of gold is to be placed in a silver chariot. Satyaváṇ also should be worshipped along with Sāvitri. In the 4th day 24, 16, 12 or 8 couples are to be honoured with gifts of clothes. Instead, the Ăcārya

CC-0. In Public Domain. Digitization by eGangotri

with his wife could also be worshipped. This system is said to have been followed in South India. In the North the system is different.

30 Śākavrata-It it is a part of Càturmāsyavrata. Śāka should not be used in the first month viz. śrāvaṇa[42].

31 Śivaratrivrata - The 14th of the dark half of the Phālguna month is 'śivarātri'. In other words the 14th in the dark half in between Mâgha and Phālguna is Śivarātri[43]. This vrata consists of fasting, rituals and waking in the night as its important features[44]. If a man does not sleep during the Śivarātri night, even though he does not undertake the vrata with all its merits, is to become equal to Rudra[45]. Pûja of Śivalinga is very important during Śivarātri. The night should be spent chanting Mûlamantra, and performing Pūjas, etc. Next day Brahmins should be given feast according to one's capacity. Then only the worshipper is permitted to finish his vrata. All men. from brahmana to candāla are eligible to undertake this vrata[46].

32 Śravaṇadvādaśivrata – The 12th day of the bright half of Bhādrapada is called Śravaṇadvādaśi. On that day Mahāviṣṇu is to be worshipped. Fasting is an important part of this vrata. One who undertakes this, will never to be born again[47].

33 Siddhivināyakavrata – It is an important vrata and is performed on the 4th of the bright half of the Bhādrapada month. Idol of Vināyaka should be made of gold, silver or mud for performing the pûjā[48].

34 Saṁkaṭacaturthīvrata – This is also an important vrata, which is to be observed on the 4th of the dark half of Bhādrapada

CC-0. In Public Domain. Digitization by eGangotri

The pùjâ is to be performed according to the approved methods of Ganeṣapùjā.

35 Kalaśasthāpanam - During Navarātravrata, Durgápùjā is peformed, placing a pot made of either gold, silver, copper or even mud, on the dais made ready for the function[49]. Kalaśasthápanam is to be made in the prescribed time and manner.

36 Knmārípūjanam - Kumaris (virgīns) are worshipped from the first day of Navarātra. The girls' legs are washed and they are made seated in attractive chairs. Flowers, garlands and so on, are being used for púja. After this function, the girls are fed with sweets, milk and honey, etc[50]. Girls from the age limit of 2 to 10 will have to be selected for this function[51]. Two year old girl is called Kumārika, three years old Trimúrtini, four years old Kalyàṇi, five years old Rohini, six years old Kāli, seven years old Candika, eight years old Śāmbhavi, nine years old Durga and ten years old Subhadra. All these girls are to be worshipped and presented with various articles according to their age.

37 Khañjanadarśana - Aftre perfoming Durgāpúja on Māhánavami and Aparājitāpúja in Daśami, the King is expected to see the bird Khañjana (the wagtail) for achieving strength and prosperity[52].

The sight of wagtail in different directions and regions and also in particular times, is considered as bringing good as well as evil effects to the man who happens to see it.

38 Gourîs āndolana - On the third of the bright half of Caitra, the Goddess Gouri is being swung along with Lord Śiva. Flowers, garlands and such other things are to be used in this ceremony. It is to be noted

CC-0. In Public Domain. Digitization by eGangotri

that the idols of the God and Goddess are mentioned here as Gouri and Śiva.

39 Tripuradâhotsava - On the fullmoon day of the Kārtika month this festival is celebrated by the people, Temples are illuminated with lights.

40 Damanotsava - This is being celebrated in the 12th of the bright half of the Caitra month every year.

41 Dolotsava – This festival takes place on the 11th of the bright half of Caitra. The idol of Māhāviṣnu along with the idol of Lakṣmi is swung on this day. This is a festival very important to Vaisnavites[53].

42 Dīpâvalimahótsava-

Dīpāvalī is the greatest of Indian festivals. In all parts of India, both north and south alike, Dìpāvalī is celebrated with enthusiasm and a sense of religious interest. Mainly it takes place on the 14th of the dark half of the Äśvina month, though opinions about the time differ according to cetain authorities.

It is said that during the time of Dìpāvalī, Lakṣmi, the Goddess of wealth dwels in Taila (oil) and Ganga-the divine river-dwels in water. So using these two (viz. oil and water) Abhyangasnâna (bath after smearing the body with oil) is to be done to avoid misfortunes[54]. Apámarga, and other plants are to be tied around the head to avoid Naraka, during the bath[55]. Fire torches are to be held by men during the night to show the fore-fathers their path[56].

Dipadâna - illumination-is an important fuction of Dipāvalí festival. Lakṣhmi is worshipped during the nightfall, after which illumination is conducted, Dipavṛkṣa (lantern) also is to be made in the

CC-0. In Public Domain. Digitization by eGangotri

temples[57]. Kuberapúja is another ritual ordained during this time[58].

After illuminations and making a Dipavṛkṣa, and also feeding brahmins and other persons, one is allowed to take meal in company of their relatives.

There are many functions explained in this work in connection with Dípāvali. Some of them are given below:-

An observance being done by the king is as follows:-

In the evening the King proclaimes that the kingdom, belongs to Bali for the day. So let the people do whatever they want to do, and move freely without any restrictions[59]. The people, on their part, decorate their homes with flowers garlands and lamps, silken cloths etc. The streets are made attractive with scores of lamps and flags. The women folk are dressed in their best for the occassion. The musicians the drummers and the like, are at their best elebratimg the event.

